**उरभ्रसारिका** स्त्री सुस्रुतोक्ते कीटभेदे कीटशब्दे विवृतिः ।

**उररी** अव्य० उर–बा०अरीक् । १अङ्गीकारे, २विस्तारे च । कृञि अस्य गतित्वात् तेन सह समासः उररीकृत्य इति "काल्पनिकं भेदमुररीकृत्य" सा०द० । घञ् उररीकार अङ्गीकारे पु० । क्त । उररीकृत स्वीकृते त्रि०

**उरल** त्रि० उर–बा० कलच् । गतियुक्ते ततो बला०चतुरर्थ्यां यत् । उरल्य तत्सन्निकृष्टदेशादौ त्रि० ।

**उरश** पु० मुनिभेदे तस्यापत्यम् पाठान्तरे तिका०फिञ् औरशायनि तस्य भर्गा०स्त्रियां तत्प्रत्ययस्य न लुक् औरशायनी ।

**उरश्छद** पु० उरश्छाद्यतेऽनेन छद–णिच्-घ ह्रस्वः । कवचे

**उरस्** बलार्थे कण्ड्वा०प०अक०सेट् । उरस्यति बलवान्भवतीत्यर्थः औरस्यीत् औरसीत् उरस्याम्(साम्)बभूव आस चकार

**उरस्** न०ऋ-असुन् धातोरुच्च रपरः । वक्षःस्थले । "कवाटविस्तीर्णमनोरमोरःस्थलस्थित श्रीललनस्य तस्य" "जनितमुदमुदस्थादुच्चकैरुच्छ्रितोरःस्थलनियतनिषण्णश्रीस्तुतां शुश्रुवान् सः" माघः । "उरोमुकुलितस्तनं जघनमंसबन्धोद्धुरम्" मालती० अस्य ब०व्री०अन्तस्य सकप्समा० "व्यूढोरस्को वृषस्कन्धः" रघुः । "प्रकृत्यैव शिलोरस्कः" कुमा० । क्वचिन्न । "हारोरा वनमार सा" सुप्रसिद्धपद्यम् । तेन निर्मितं अण् औरस, पुत्रभेदे "औरसः क्षेत्रजश्चैव दत्तः कृत्रिमएव चेति" कालि० पु० उरोजातमात्रे च औरसं भयम् । पक्षे यत् उरस्य । वक्षोगते । २श्रेष्ठे न० । तस्य ६त०अन्ते अच् समा० । अश्वोरस अश्वप्रधाने । ३ऋषिभेदे पु० तस्यापत्यम् तिका० फिञ् औरसायनि । उरशवत् भर्गादिकार्यम् । उरः प्राशस्त्येनास्य अर्शआ० अच् । उरस प्रशस्तोरस्के त्रि० । पाठान्तरे तिकादिषु उरसशब्दोऽपि पठ्यते उरशवत् फिञ् भर्गादिकार्यञ्च ।

**उरसिज** पु० उरसि जायते जन–ड त० सप्तम्या अलुक् । स्त्रीवक्षोजाते स्तने । "परिपस्पृशिरे चैनं पीनैरुरसिजैः भृङ्गः" रामा० । उरसिजातोरसिरुहादयोऽप्यत्र । "फेनानामुरसिरुहेषु हारलीलाम्" माघः

**उरसिल** त्रि० उरः प्राशस्त्येनास्त्यस्य पिच्छा० इलच् । प्रशस्तोरस्के । पक्षे मतुप् मस्य वः । उरस्वत् तत्रार्थे स्त्रियां ङीप् ।

**उरस्कट** पु० उरः कट्यते आव्रियतेऽनेन कट-घञर्थे करणे क । १बालानामुत्तरीयभेदे तदीये यज्ञोपवीताकारे २वस्त्रभेदे च । (बुकबाछाड़) । त्रिका० ।

**उरस्तस्** अव्य० उरसैका दिक् तसिः, पञ्चम्याद्यर्थे तसिल् वा । १हृदयैकदेशभवे पुत्रे २वक्षस इत्याद्यर्थे च अत्र लित्त्वात् स्वरितस्वर इतिभेदः । [ल्युट् । उरस्त्राणमप्यत्र न० ।

**उरस्त्र** न० उरस्त्रायते त्रै–क । वक्षोरक्षके कवचे । करणे

**उरस्य** पु० उरसैका दिक् यत् । वक्षसैकदेशगत । "कर्मणा वाप्युरस्येन वक्षो यस्य विदारितम्" सुश्रुतः निर्मितार्थे यत् । २पुत्रे

**उरी** अव्य० उर–गतौ बा० ईक् । १अङ्गीकारे, २विस्तारे च । ऊर्य्यादि० कृञि गतित्वम् तेन समा० । ल्यप् उरीकृत्य "तदुरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते" माघः ।

**उरीकार** पु० उर+कृ–घञ् । १स्वीकारे, विस्तारे च ।

**उरीकृत** त्रि० उरी+कृ–क्त । १अङ्गीकृते, २विस्तृते, च ।

**उरु** त्रि० ऊर्णु–कु नुलोपो ह्रस्वश्च । १विशाले, २वृहति च "विस्तीर्णं दृष्टवानुरम्बरप्रकाशं तेऽगाधं निधिमुरुसम्भसामनन्तम्" भा० आ० २२अ० । ३बहुले निरु० "त्वविजाता उरुज्रया" ऋ०१,२,९, "उरुज्रया बहुनिवासौ" भा० "रथे युञ्जन्नुरुचक्रे" । ४विस्तीर्णे च वृहत्त्वस्य विस्तारणीयत्त्वात् । "जनाय उरु लोकं मुजनिमा चकार" ऋ०७,१००,४, "स्वस्तिमदुरुक्षितौ गृणीहि", ऋ०९,८४,१, उरुगायः "उरुगव्यूतिरभयानि" ऋ० ९,९०,४, "अहोस्विदस्मा उरुर्भक्तिरद्भुतः" २,२६,४, "अन्यामिषमुरुधारामरङ्कृतम्" ८,१,१०, "उरुप्रथाः प्रथमानम्" यजु०२०,३९, "गाथयोरौ रथ उरुयुगे" ऋ० ८,९८,९, ।५दीर्घे च "गतोरुमार्गाः" माघः भाषितपुंस्कत्वात् क्लीबे तृतीयाद्यचि वा पुंवत् । उरवे उरुणे इत्यादि स्त्रियां गुणवचनत्वात् वा ङीष् । "शिरोभिस्ते गृहीत्वोर्वीं स्रजमारक्तवाससः" मनुः उरोर्भावः इम्वा० इमनिच् । वरिमन् तद्भावे । पक्षे त्व, उरुत्व न० । तल् उरुता स्त्री अण् औरव न० । तद्भावे ।

**उरुकाल** पु० उरुः कालः पाकोऽस्य । (राखालशशा) १महाकाललतायाम्" रत्नमा० । कर्म० । २दीर्घकाले ।

**उरुक्रम** पु० उरवः भूम्यादिव्यापकत्वात् क्रमाः पादविक्षेपा अस्य । १वामनरूपे भगवदवतारे "यस्योरुषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा" ऋ०१,१५४,२, "यस्य विष्णोरुरुषु विस्तीर्णेषु त्रिसंख्याकेषु विक्रमणेषु पादप्रक्षेपेषु विश्वा सर्वाणि भुवनानि भूतजातान्याश्रित्य निवसन्ति स विष्णुः स्तूयते" भा० । इति तस्योरुक्रमत्वे लिङ्गमुक्तम् । "शं न इन्द्रो वृहस्पतिः शं नो विष्णुरुरुक्रमः" ऋ०१,९,९, उरु विस्तीर्णं क्रामति पादान् विक्षिपतीत्युरुक्रमः विष्णुः" भा० । उरु प्रधानं पदमाश्रमं क्रामति-क्रम–